# shrIkRiShNa aShTaka

# શ્રીકૃષ્ણાષ્ટક બ્રહ્માનન્દવિરચિતમ્

## Document Information

Text title : kRiShNa aShTaka

File name : brahmaanandakrishna8.itx

Category : aShTaka, vishhnu, krishna, brahmAnanda, vishnu

Location : doc_vishhnu

Author : Brahmananda

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 16, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# shrIkRiShNa aShTaka

# શ્રીકૃષ્ણાષ્ટક બ્રહ્માનન્દવિરચિતમ્

શ્રી ગણેશાય નમઃ ।

(પ્રમાણિકા છન્દઃ)

ચતુર્મુખાદિસંસ્તુતં સમસ્તસાત્વતાનુતમ્ ।
હલાયુધાદિસંયુતં નમામિ રાધિકાધિપમ્ ॥ ૧॥

બકાદિદૈત્યકાલકં સગોપગોપિપાલકમ્ ।
મનોહરાસિતાલકં નમામિ રાધિકાધિપમ્ ॥ ૨॥

સુરેન્દ્રગર્વગઞ્જનં વિરઞ્ચિમોહભઞ્જનમ્ ।
વ્રજાઙ્ગનાનુરઞ્જનં નમામિ રાધિકાધિપમ્ ॥ ૩॥

મયૂરપિચ્છમણ્ડનં ગજેન્દ્રદન્તખણ્ડનમ્ ।
નૃશંસકંસદણ્ડનં નમામિ રાધિકાધિપમ્ ॥ ૪॥

પ્રદત્તવિપ્રદારકં સુદામધામકારકમ્ ।
સુરદ્રુમાપહારકં નમામિ રાધિકાધિપમ્ ॥ ૫॥

ધનઞ્જયાજયાવહં મહાચમૂક્ષયાવહમ્ ।
પિતામહવ્યથાપહં નમામિ રાધિકાધિપમ્ ॥ ૬॥

મુનીન્દ્રશાપકારણં યદુપ્રજાપહારણમ્ ।
ધરાભરાવતારણં નમામિ રાધિકાધિપમ્ ॥ ૭॥

સુવૃક્ષમૂલશાયિનં મૃગારિમોક્ષદાયિનમ્ ।
સ્વકીયધામમાયિનં નમામિ રાધિકાધિપમ્ ॥ ૮॥

ઇદં સમાહિતો હિતં વરાષ્ટકં સદા મુદા ।
જપઞ્જનો જનુર્જરાદિતો દ્રુતં પ્રમુચ્યતે ॥ ૯॥

॥ ઇતિ શ્રીપરમહંસબ્રહ્માનન્દવિરચિતં શ્રીકૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*shrIkRiShNa aShTaka*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*